# ॥ वाल्मीकि रामायण॥

## ४ किष्किन्धाकाण्ड

### अध्याय ५०

इत्युक्त्वा हनुमांस्तत्र पुनः कृष्णाजिनाम्बराम् ।
अब्रवीत्तां महाभागां तापसीं धर्मचारिणीम् ॥ १॥

इदं प्रविष्टाः सहसा बिलं तिमिरसंवृतम् ।
क्षुत्पिपासा परिश्रान्ताः परिखिन्नाश्च सर्वशः ॥ २॥

महद्धरण्या विवरं प्रविष्टाः स्म पिपासिताः ।
इमांस्त्वेवं विधान्भावान्विविधानद्भुतोपमान् ।
दृष्ट्वा वयं प्रव्यथिताः सम्भ्रान्ता नष्टचेतसः ॥ ३॥

कस्येमे काञ्चना वृक्षास्तरुणादित्यसंनिभाः ।
शुचीन्यभ्यवहार्याणि मूलानि च फलानि च ॥ ४॥

काञ्चनानि विमानानि राजतानि गृहाणि च ।
तपनीय गवाक्षाणि मणिजालावृतानि च ॥ ५॥

पुष्पिताः फालवन्तश्च पुण्याः सुरभिगन्धिनः ।
इमे जाम्बूनदमयाः पादपाः कस्य तेजसा ॥ ६॥

काञ्चनानि च पद्मानि जातानि विमले जले ।
कथं मत्स्याश्च सौवर्णा चरन्ति सह कच्छपैः ॥ ७॥

आत्मानमनुभावं च कस्य चैतत्तपोबलम् ।
अजानतां नः सर्वेषां सर्वमाख्यातुमर्हसि ॥ ८॥

एवमुक्ता हनुमता तापसी धर्मचारिणी ।
प्रत्युवाच हनूमन्तं सर्वभूतहिते रता ॥ ९॥

मयो नाम महातेजा मायावी दानवर्षभः ।
तेनेदं निर्मितं सर्वं मायया काञ्चनं वनम् ॥ १०॥

पुरा दानवमुख्यानां विश्वकर्मा बभूव ह ।
येनेदं काञ्चनं दिव्यं निर्मितं भवनोत्तमम् ॥ ११॥

स तु वर्षसहस्राणि तपस्तप्त्वा महावने ।
पितामहाद्वरं लेभे सर्वमौशसनं धनम् ॥ १२॥

विधाय सर्वं बलवान्सर्वकामेश्वरस्तदा ।
उवास सुखितः कालं कं चिदस्मिन्महावने ॥ १३॥

तमप्सरसि हेमायां सक्तं दानवपुङ्गवम् ।
विक्रम्यैवाशनिं गृह्य जघानेशः पुरन्दरः ॥ १४॥

इदं च ब्रह्मणा दत्तं हेमायै वनमुत्तमम् ।
शाश्वतः कामभोगश्च गृहं चेदं हिरण्मयम् ॥ १५॥

दुहिता मेरुसावर्णेरहं तस्याः स्वयं प्रभा ।
इदं रक्षामि भवनं हेमाया वानरोत्तम ॥ १६॥

मम प्रियसखी हेमा नृत्तगीतविशारदा ।
तया दत्तवरा चास्मि रक्षामि भवनोत्तमम् ॥ १७॥

किं कार्यं कस्य वा हेतोः कान्ताराणि प्रपद्यथ ।
कथं चेदं वनं दुर्गं युष्माभिरुपलक्षितम् ॥ १८॥

इमान्यभ्यवहार्याणि मूलानि च फलानि च ।
भुक्त्वा पीत्वा च पानीयं सर्वं मे वक्तुमर्हथ ॥ १९॥

The files in this directory are revised versions of the digital files produced by Professor Muneo Tokunaga, Kyoto University, and copyrighted by him. I am grateful to Professor Tokunaga for his agreement to this use of his original files and for permitting the revised versions to be made publicly available.
Dr J. D. Smith ; email: jds10@cam.ac.uk ; http://bombay.oriental.cam.ac.uk/index.html

ITRANS conversion questions to: Avinash Chopde ¡avinash@acm.org¿

Last updated on March 25, 1998; Send corrections to sanskrit@cheerful.com